# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१)

२५.०७.२०११

## हल्

- ह् य् व् र्
- ल्
- ञ् म् ङ् ण् न्
- झ् भ्
- घ् ढ् ध्
- ज् ब् ग् ड् द्
- ख् फ् छ् ठ् थ् च् ट् त्
- क् प्
- श् ष् स्

# हकारान्ताः पुंलिङ्गाः

- लिह आस्वादने - कर्तरि क्विप् प्रत्ययः ।
- लिह्   (क्विप्) व् ('क्विप् च' - ३.२.७६ - इति क्विप्)
- लिह्   ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)
- लिहति इति 'लिह्' ।
- [मधुलिट् = भ्रमरः]

- लिह्  (सुँ) स्
- लिह्   ('हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' - ६.१.६८)

# ३२४. हो ढः (८.२.३१)

- पदद्वयम् । हः, ढः ।
- ‘झलो झलि’ (८.२.२६) इत्यतः ‘झलि’ इति, ‘स्कोः संयोगाद्योरन्ते च’ (८.२.२९) इत्यतः ‘अन्ते’ इति च अनुवर्तते । ‘पदस्य’ (८.१.१६) इत्यधिक्रियते ।
- हस्य ढः स्यात् झलि पदान्ते च ।
- ‘हल्ङ्याप्...’ इति सुलोपः, पदान्तत्वाद् हस्य ढः, जश्त्वचर्त्वे, लिट्, लिड् ।
- लिह्
- लिढ्   (‘हो ढः’ - ८.२.३१ - इति ढत्वम्)
- लिड्   (‘झलां जशोऽन्ते’ - ८.२.३९)
- लिट्   (‘वाऽवसाने’ - ८.४.५६ - इति विकल्पेन चर्त्वम्)

ભ लिहौ, लिहः ।

ભ लिहम्, लिहौ, लिहः ।

ભ लिहा, लिड्भ्याम् इत्यादि ।

ભ हलादिषु प्रत्ययेषु परेषु पदन्तत्वात् ढत्वम् । 'झलां जशोऽन्ते' इति जश्त्वम् ।

- लिह् सु
- लिढ् सु (‘हो ढः’ - ८.२.३१)
- लिड् सु (‘झलां जशोऽन्ते’ - ८.२.३९)
- लिड् ध् सु (‘डः सि धुट्’ - ८.३.२९ - इति धुडागमः)
- लिड् त् सु (‘खरि च’ - ८.४.५५ - इति चर्त्वम्)
- लिट् त् सु (‘खरि च’ - ८.४.५५ - इति चर्त्वम्)
- धुडभावे,
- लिट्सु (‘खरि च’ - ८.४.५५ - इति चर्त्वम्)

# हकारान्तः पुँल्लिङ्गः लिह्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | लिट्/लिड् | लिहौ | लिहः |
| | हे लिट्/हे लिड् | हे लिहौ | हे लिहौ |
| | लिहम् | लिहौ | लिहः |
| तृ[illegible] | लिहा | लिड्भ्याम् | लिड्भिः |
| चतुर्थीविभक्तिः | लिहे | लिड्भ्याम् | लिड्भ्यः |
| पञ्चमीविभक्तिः | लिहः | लिड्भ्याम् | लिड्भ्यः |
| षष्ठीविभक्तिः | लिहः | लिहोः | लिहाम् |
| सप्तमीविभक्तिः | लिहि | लिहोः | लिट्त्सु/लिट्सु |

हलादिषु प्रत्ययेषु ‘हो ढः’ इति ढत्वम् । जश्त्वम्

सुपि ढत्वजश्त्वयोः कृतयोः वा धुडागमः

- दुह प्रपूरणे
- दुह् (क्विप्) व् ('क्विप् च' - ३.२.७६)
- दुह् ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)

- दुह् (सुँ) स्
- दुह् ('हल्ङ्याब्भ्यो दीर्घात्...' - ६.१.६८ - इति सुलोपः)
  - 'हो ढः' इति ढत्वे प्राप्ते,

# ३२५. दादेर्धातोर्घः (८.२.३२)

- पदत्रयम् । दादेः, धातोः, घः ।
- 'झलो झलि' (८.२.२६) इत्यतः 'झलि' इति, 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यतः 'अन्ते' इति, 'हो ढः' (८.२.३१) इत्यतः 'हः' इति च अनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- उपदेशे दादेः धातोः हस्य घः स्यात् झलि पदान्ते च ।
- दुह्
- दुघ्  ('दादेर्धातोर्घः' - ८.२.३२)

- उपदेशे किम्?
- अधोग् इत्यत्र यथा स्यात्,
- दुह्-धातोः लङ्-लकारे अडागमे कृते दकारादित्वाभावेऽपि, उपदेशे दादित्वात् घत्वं भवति ।
- दामलिहम् आत्मनः इच्छति दामलिह्यति, ततः क्विपि दामलिट्, अत्र मा भूत् ।
- अत्र उपदेशे धातुः लकारादिः, न तु दादिः । अतः घत्वं न ।

- दुघ् इति घत्वे कृते,

# ३२६. एकाचो बशो भष् झषन्तस्य स्ध्वोः (८.२.३७)

- पञ्च पदानि । एकाचः, बशः, भष्, झषन्तस्य, स्ध्वोः ।
- 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यतः 'अन्ते' इति, 'दादेर्धातोर्घः' (८.२.३२) इत्यतः 'धातोः' इति च अनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- बश् - ब्, ग्, ड्, द्
- भष् - भ्, ग्, ढ्, ध्
- झष् - झ्, भ्, घ्, ढ्, ध्
- धातोरवयवः यः एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च ।

- दुघ्

एकाच्

- द् उ घ् - धातुः

बश् झष्

- ध् उ घ्

भष्

- धुघ् ('एकाचो बशो...' - ८.२.३७)
- धुग् ('झलां जशोऽन्ते' - ८.२.३९)
- धुक् ('वाऽवसाने' - ८.४.५६)

ஜ एकाचो धातोः - इति सामानाधिकरण्येन अन्वये तु इह न स्यात् - गर्दभम् आचष्टे गर्दभयति, ततः क्विप्, णिलोपः, गर्धप् ।

ஜ गर्दभ (णि) इ ('तत्करोति तदाचष्टे' इति णिच्)

ஜ गर्दभ् इ ('अतो लोपः' - ६.४.४८ - इति अकारलोपः)

ஜ गर्दभ् इ (क्विप्) व् ('क्विप् च' - इति कर्तरि क्विप्)

ஜ गर्दभ् व् ('णेरनिटि' - ६.४.५१ - इति णिलोपः)

ஜ गर्दभ् ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)

ஜ अयं धातुः एकाच् न । किन्तु तदवयवस्य एकाचः = दभ् इत्यस्य झषन्तत्वमस्ति)

ஜ गर्धभ् ('एकाचो बशो...' - ८.२.३७)

ஜ गर्धब् / गर्धप्

☙ झलीति निवृत्तम्, स्ध्वोः ग्रहणसामर्थ्यात् ।
☙ तेन इह न - दुग्धम्, दोग्धा ।

☙ व्यपदेशिवद्भावेन धात्ववयवत्वाद् भष्भावः, जश्त्वचर्त्वे ।
☙ धुक्/ धुग् ।
☙ दुहौ, दुहः ।

**षत्वचर्त्वे, घुक्षु ।**

- दुह् सु
- दुघ् सु ('दादेर्धातोर्घः' - ८.२.३२ - इत् घत्वम्)
- धुघ् सु ('एकाचो बशो ...' - ८.२.३७ - इति भष्भावः)
- धुग् सु ('झलां जशोऽन्ते' - ८.२.३९ - इति जश्त्वम्)
- धुग् षु ('आदेशप्रत्यययोः' - ८.३.५९ - इति कवर्गात् परत्वात् षत्वम्)
- धुक् षु ('खरि च' - ८.४.५५ - इति चर्त्वम्)
- धुक्षु

# हकारान्तः पुँल्लिङ्गः दुह्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | धुग्/ धुक् | दुहौ | दुहः |
| | हे धुग् / हे धुक् | हे दुहौ | हे दुहः |
| | दुहम् | दुहौ | दुहः |
| | दुहा | धुग्भ्याम् | धुग्भिः |
| चतुर्थीविभक्तिः | दुहे | धुग्भ्याम् | धुग्भ्यः |
| पञ्चमीविभक्तिः | दुहः | धुग्भ्याम् | धुग्भ्यः |
| षष्ठीविभक्तिः | दुहः | दुहोः | दुहाम् |
| सप्तमीविभक्तिः | दुहि | दुहोः | धुक्षु |

हलादिषु प्रत्ययेषु 'दादेर्धातोर्घः' इति घत्वम् । 'एकाचो..' इति दस्य धः ।

सुपि घत्व-भष्भाव-जश्त्व-षत्व-चर्त्वाः